यज्ञस्य सर्व्वसम्भारं वेदीं यज्ञस्य विस्तृताम् ॥
हवने वर्त्तमाने तु सर्पाणां तक्षको गतः ।
इन्द्रं प्रति भयार्त्तोऽहं त्राहि मामिति चाब्रवीत् ॥
भयभीतं समाश्वास्य स्वासने सन्निवेश्य च ।
ददावभयमत्यर्थं निर्भयो भव पन्नग ! ॥
तमिन्द्रशरणं ज्ञात्वा मुनिर्द्दत्ताभयं तथा ।
उत्तङ्कोऽह्वयदुद्विग्नः सेन्द्रं कृत्वा निमन्त्रणम् ॥
स्तुतस्तदा तक्षकेण यायावरकुलोद्भवः ।
आस्तीको नाम धर्म्मात्मा जरत्कारुसुतो मुनिः ॥
तत्रागत्य मुनेर्बालस्तुष्टाव जनमेजयम् ।
राजा तमर्च्चयामास दृष्ट्वा बालं सुपण्डितम् ॥”)

जनयित्री, स्त्री, (जनयितृ + ङीप् ।) माता । इत्यमरः । २ । ६ । २९ ॥ (यथा, रघुः । १० । ७० ।
“कैकेय्यास्तनयो जज्ञे भरतो नाम शीलवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥”)

जनरवः, पुं, (जनेषु लोकेषु रवः प्रवादः ।) लोकवादः । यथाह लक्ष्मणसेनः ।
“परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः ॥”

जनलोकः, पुं, (जन एव लोकः ।) महर्लोकोपरिभुवनम् । यथा,—
“अयं स हि महर्लोकः स्वर्लोकात् परमाद्भुतः ।
कल्पायुषो वसन्त्यत्र तपसा धुतकल्मषाः ॥
इत्थं कथां कथयतोर्भगवद्गणयोः प्रिये ! ।
क्षणार्द्धेन विमानन्तञ्जनलोकं निनाय तान् ॥
निवसन्त्यमला यत्र मानवा ब्रह्मणः सुताः ।
सनन्दनाद्या योगीन्द्राः सर्व्वे ते ह्यूर्द्ध्वरेतसः ॥
अन्ये तु योगिनो ये वै ह्यखण्डब्रह्मचारिणः ।
सर्व्वद्वन्द्वविनिर्म्मुक्तास्ते वसन्त्यत्र निर्म्मलाः ॥
महर्लोकः क्षितेरूर्द्ध्वमेककोटिप्रमाणतः ।
कोटिद्वयेतिसंख्यातो जनो भूर्लोकतो जने ! ॥”
इति स्कान्दे काशीखण्डम् ॥

जनवल्लभः, पुं, (जनानां लोकानां वल्लभः प्रियः ।) श्वेतरोहितवृक्षः । इति राजनिर्घण्टः ॥ लोकप्रिये, त्रि ॥

जनवादः, पुं, (जनेषु लोकेषु वादोऽपवादः ।) जनप्रवादः । इति हेलायुधः ॥ (यथा, आर्य्यासप्तशत्याम् । ४१६ ।
“भस्मपरुषेऽपि गिरिशे स्नेहमयी त्वमुचितेन सुभगासि ।
मोघस्त्वयि जनवादो यदोषधिप्रस्थदुहितेति ॥”)

जनश्रुतिः, स्त्री, (जनेभ्यः श्रुतिः श्रवणम् ।) सत्यमसत्यं वा लोकप्रवादः । तत्पर्य्यायः । किंवदन्ती २ । इत्यमरः । १ । ६ । ७ ॥ (यथा, आर्य्यासप्तशत्याम् । ३६५ ।
“पुंसां दर्शय सुन्दरि ! सुखेन्दुमीषत्त्रपामपाकृत्य ।
जायाजित इति रूढ़ा जनश्रुतिर्मे यशो भवतु ॥”)

जनस्थानं, क्ली, (जनस्य स्थानं भूभागः ।) दण्डकारण्यम् । इति जटाधरः ॥ दण्डकारण्यसमीपस्थानविशेषः । यथा । इक्ष्वाकुराजपुत्त्रो दण्डः शुक्राचार्य्यकन्यामरजां बलाद्गृहीत्वा मैथुनं कृतवान् स मुनिस्तत् श्रुत्वा राजानं शशाप । यथा,—
“सप्तरात्रेण राजासौ सभृत्यबलवाहनः ।
पापकर्म्मसमाचारो वधं प्राप्स्यति दुर्म्मतिः ॥
सर्व्वसत्त्वानि यानीह जङ्गमानि स्थिराणि च ।
सर्व्वेषां पांशुवर्षेण क्षयः क्षिप्रं भविष्यति ॥
दण्डस्य विषयो यावत् तावत् सवनमाश्रमम् ।
पांशुभूतमिवाकस्मात् सप्तराचाद्भविष्यति ॥
इत्युक्त्वा क्रोधसन्तप्तस्तदाश्रमनिवासिनम् ।
जनं जनपदस्यान्ते स्थीयतामित्यवोचत ॥
सप्ताहाद्भस्मसाद्भूतः स चापि ब्रह्मतेजसा ।
तस्य दण्डस्य विषयो विन्ध्यशैलस्य सानुषु ॥
तदाप्रभृति काकुत्स्थ ! दण्डकारण्यमुच्यते ।
तपस्विनः स्थिता यत्र तज्जनस्थानमुच्यते ॥”
इति रामायणम् ॥
(अत्र रावणस्य खरदूषणप्रभृतीनि सैन्यान्यासन् । यथा, रामायणे । १ । १ । ४६ ।
“तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥”
“जनस्थानं नाम दण्डकारण्ये रावणबलनिवेशस्थानम् ।” इति तट्टीकायां रामानुजः ॥)

जना, स्त्री, (जननमिति । जन + वाहुलकात् अङ् ।) उत्पत्तिः । इति मुग्धबोधम् ॥

जनान्तः, पुं, (जनस्य प्रदेशस्य अन्तः ।) देशः । इति धनञ्जयः । सीमा इति पारस्यभाषा ॥

जनान्तिकम्, क्ली, अप्रकाशः । इति त्रिकाण्डशेषः ॥ (एतल्लक्षणं यथा, साहित्यदर्पणे ।
“त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ॥”
एतल्लक्षणोक्तमप्रकाशकथनम् । नाटके एव अस्य भूरिप्रयोगो दृश्यते ॥ जनस्य अन्तिकम् । जनसमीपञ्च ॥)

जनार्द्दनः, पुं, विष्णुः । इत्यमरः । १ । १ । १९ ॥ तन्नामव्युत्पत्तिर्यथा । “समुद्रान्तवासिनो जननामकोऽसुरान् अर्द्दितवान् जनार्द्दनः । अर्द्द वधे अर्द्दकश्च नन्द्यादित्वादनः । किंवा जनैर्लोकैरर्द्द्यते याच्यते पुरुषार्थानसौ जनार्द्दनः । अर्द्द यातनागतियाचने कर्म्मणि अनट् । किंवा जननं जनः भावे घञ् । जनं जन्म अर्द्दयति हन्ति भक्तस्य मुक्तिदत्वादिति जनार्द्दनः । किंवा जनान् लोकान् अर्द्दति हररूपेण संहारकत्वादिति जनार्द्दनः । किंवा जनयति उत्पादयति लोकान् ब्रह्मरूपेण सृष्टिकर्त्तृत्वादिति जनः जनेर्ण्यन्तात् पचाद्यच् । अर्द्दति हन्ति लोकान् हररूपेण संहारकारित्वादिति अर्द्दनः जनश्चासौ अर्द्दनश्चेति जनार्द्दनः । किंवा जनान् लोकान् अर्द्दति गच्छति प्राप्नोति रक्षणार्थं पालकत्वादिति जनार्द्दनः ।” इत्यमरटीकायां भरतः ॥ * ॥ गयायां तस्य हस्ते जीवितस्य पिण्डदानविधिर्यथा,—
“जनार्द्दनो भस्मकूटे तस्य हस्ते तु पिण्डदः ।
आत्मनोऽप्यथवान्येषां सव्येनैव तिलैर्विना ॥
जीवता दधिसंमिश्रं सर्व्वे ते विष्णुलोकगाः ।
यस्तु पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
यमुद्दिश्य त्वया देयस्तस्मिन् पिण्डो मृते प्रभो ! ॥
एष पिण्डो मया दत्तस्तव हस्ते जनार्द्दन ! ॥
अन्तकाले गते मह्यं त्वया देयो गयाशिरे ।
जनार्द्दन ! नमस्तुभ्यं नमस्ते पितृमोक्षद ! ॥
पितृपात्र नमस्तुभ्यं नमस्ते पितृरूपिणे ।
गयायां पितृरूपेण स्वयमेव जनार्द्दनः ॥
तं दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात् ।
नमस्ते पुण्डरीकाक्ष ! ऋणत्रयविमोचन ! ॥
लक्ष्मीकान्त ! नमस्तेऽस्तु पितृमोक्षप्रदो भव ।
वामजानु च सम्पात्य नत्वा भीमो जनार्द्दनम् ॥
श्राद्धं सपिण्डकं कृत्वा भ्रातृभिर्ब्रह्मलोकभाक् ।
पितृभिः सह धर्म्मात्मा कुलानाञ्च शतेन च ॥
शिलायां व्यक्तरूपेण व्यक्ताव्यक्तात्मना स्थितः ।
लक्ष्मीशो विबुधैः सार्द्धं तस्माद्देवमयी शिला ॥”
इति श्रीवायुपुराणे श्वेतवाराहकल्पे गयामाहात्म्ये ४ अध्यायः ॥ * ॥ शालग्रामशिलाविशेषः । तल्लक्षणं यथा,—
“सशङ्खचक्राब्जगदं जनार्द्दनमिहो नमः ।
उपेन्द्रं गदिनं साविपद्मशङ्ख ! नमोऽस्तु ते ॥”
इति पाद्मे पातालखण्डे १० अध्यायः ॥
“आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानञ्च शङ्करादिच्छेन्मुक्तिमिच्छेज्जनार्द्दनात् ॥”
इति कर्म्मलोचनम् ॥

जनाशनः, पुं, (जनानश्नाति भक्षयतीति । अश + ल्युः ।) वृकः । इति राजनिर्घण्टः ॥

जनाश्रयः, पुं, (जनानां लोकानामाश्रयः ।) मण्डपः । इत्यमरः । २ । २ । ६ ॥

जनिः, स्त्री, (जननमिति । जन + “जनिघसिभ्यामिण् ।” उणां ४ । १२९ । इति इण् । जनिवध्योश्चेति वृद्धिनिषेधः ।) उत्पत्तिः । इत्यमरः । १ । ४ । ३० ॥ (यथा, हरिवंशे । २०८ । ४० ।
“वनस्पत्योषधीश्चैव युगपत् प्रतिपद्यसे ।
बालभावाय वसुधां पक्षे पक्षे जनिस्तव ॥”
जायते यस्याम् । जन + आधारे इण् ।) नारी । माता । इति शब्दरत्नावली ॥ (जायते सुखमनयेति । करणे इण् ।) जनीनामगन्धद्रव्यम् । इत्यमरटीकायां रायमुकुटः ॥

जनिका, स्त्री, (जायते वंशो यस्यामिति जनिः । ततः स्वार्थे कन् टाप् च ।) स्नुषा । इति शब्दरत्नावली ॥ (जनिशब्दार्थः ॥) जननकर्त्री च ॥

जनितं, त्रि, (जन्यते स्मेति । जन + णिच् + क्तः ।) उत्पादितम् । यथा,—
“सेनाचरी भवदिभाननदानवारि-
वासेन यस्य जनिता सुरभी रणश्रीः ।”
इति नैषधम् ॥
(यथा च हरिवंशे । १६१ । ३१ ।
“अतोऽहं कामयामि त्वां नहि त्वं जनितो मया ।
रूपन्ते सौम्य ! पश्यन्ती सीदामि हृदि दुर्ब्बला ॥”)